श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ उत्सवस्तबकः ॥

*This document** *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ उत्सवस्तबकः ॥

विख्यातविभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान् यस्या विरिञ्च्याद्या वितन्वते॥ १ ॥

विधिशिवप्रमुखा विबुधेश्वरा विविधमच्युतपत्नि तवोत्सवम्।
अकलयन् सकलस्य शरीरिणो निरवधीरवधीरयितुं व्यथाः॥ २ ॥

निरुपमं युवयोः शुभमुत्सवं जननि लोकयितुं धृतकौतुका।
उपगता किल कापि परा त्वरां पुरवधूरवधूतगृहक्रिया॥ ३ ॥

जननि सत्वरचङ्क्रमसम्भ्रमे चरणतः पतितौ मणिनूपुरौ।
तव महोत्सव भूमजनोन्मिषत्कुतुकया तु कयाचिदनादृतौ॥ ४ ॥

तव महे गतिमान्द्य कृतौ कुचाविति रुषा चलिताशु रमेऽपरा।
अनुगृहीततदञ्चलनिर्गलन्नवसरावसरात्ययभीरुका॥ ५ ॥

श्रुतभवन्महवाद्यरवा जवात् पथि रमे चलिताभरणस्वनैः।
श्रुतरुतेऽन्तरितेऽसि सुवञ्चितेत्यपरयापरया हसिता वधूः॥ ६ ॥

महमहीभजनोत्कलिकाकृत द्रुतगतिः श्लथपुष्पपरम्परा।
कृतवतीव मुदा कुसुमाञ्जलिं तव रमे वरमेखलमध्यमा॥ ७ ॥

महजुषस्तव देवि सिसेविषा दिशति मन्दगतेरपि सद्गतिम्।
तदिह दिव्यगतिं वितरिष्यसि त्वममले मम लेखदुरासदाम्॥ ८ ॥

अभिचकाङ्क्ष मनःप्रभवं जवं चरणयोरपि काचन सादरा।
कलयितुं भवतीं कलशाम्बुधेर्दुहितरं हितरम्यमहोत्सवाम्॥ ९ ॥

जननि तामरसोदरसोदर श्रियमवेक्ष्य सविस्मयमुत्सवे।
न ततृपुर्नरदैवतयोषितः शुभवतीं भवतीं सह शौरिणा॥ १० ॥

प्रियतमार्पित यावक पादया तव महोत्सवभूर्न यया रमे।
द्रुतमगामि पदोर्न परं धृतः कुपितयापि तयारुणिमा दृशोः॥ ११ ॥

अभिवृषाचलमापततां द्रुतं तव रमे परमोत्सवलिप्सया।
अजनि नो पथिभिः समयात्ययो दिविषदां विषदान्तरितैरपि॥ १२ ॥

प्रसृमरागरुधूपपरम्परा सुरभिताः शुभदीपशतावृताः।
त्रियुगपत्नि महोत्सवभूमयः सुरचयं रचयन्ति सविस्मयम्॥ १३ ॥

तव महं प्रति यज्ञनकम्पितैः सुरतरोः शिखरैः स्वयमीरिताः।
जननि वेङ्कटशैलमभूषयन् सुमनसो मनसो हरणक्षमाः॥ १४ ॥

शुभतराभरणाभरणात्मना रुचितरङ्गपिशङ्गितसद्मना।
जननि सार्थयसे मरुतां महोत्सवपुषा वपुषानिमिषा दृशः॥ १५ ॥

मधुजिता सममुत्सवमण्डपे स्थितवतीं भवतीमवलोकितुम्।
अभिरुचिः पुनराप्तकुतूहलैर्निजगृहे जगृहे न वधूजनैः॥ १६ ॥

अधिमहोत्सवमर्णवकन्यके परमभक्तिजुषा प्रणतिस्तव।
तनुधनुर्लतया सुदृशां गुरुस्तनतया नतया सुकराभवत्॥ १७ ॥

भजनहर्षजनाट्यजवोज्ज्वलन् मुकुटलोलमरुत्सरिदुज्झितैः।
जलकणैर्भवदुत्सवमेदिनीः शशिशिराः शिशिराः कुरुते रमे॥ १८ ॥

त्रिनयनेन विनम्रशिरः क्षरत्त्रिदशसिन्धुमहोर्मिभिरुत्सवे।
किमपि पाद्यमदायि पदाब्जयोर्नतवता तव तामरसानने॥ १९ ॥

तव महे मिलितात् त्रिदशीगणान्न बिभिदे नरलोकवधूजनः।
त्वदवलोकनविस्मयतो यतो जननि मे न निमेषमवाप सः॥ २० ॥

प्रणयिना सममुत्सवमण्डपे स्थितिमतीं भवतीं प्रणिनंसवः।
अहिगिरिं हरिपत्नि समाश्रितास्त्रिदिविनो दिवि नोपययुः स्पृहाम्॥ २१ ॥

अधिमहं कमले भवतीं स्तुवन्नभिमुखः स्तिमितेक्षणमग्रतः।
अपि सुरेष्वसुरेषु नरेषु वा शिरसि को रसिको न दधेऽञ्जलिम्॥ २२ ॥

अधिमहोत्सवमप्सरसां गणैः सह रमे परभक्तिजुषस्त्वयि।
पुलकिनः कलगद्गदगीतयो मुनिजना निजनाट्यमदर्शयन्॥ २३ ॥

उपनतोत्सवदिव्यगृहाङ्गणः कमलवासिनि संयमिनां गणः।
निगमसौरभशोभनया स्तुतिं स हि गिराहिगिरावकरोत्तव॥ २४ ॥

मधुविरोधिपुरन्ध्रि महोत्सवे शुभगुणग्रथिता किल मालिका।
स्तवमथी स्तबकैस्तव कैर्गिरा न कलिता कलिताडन काङ्क्षिभिः॥ २५ ॥

तव महे स्तवकोटिचिकीर्षया दृगधिका रसनाश्चकमे रमे।
रचयितुं स्तवमेकरसज्ञया कृशतमं शतमन्युरतित्रपः॥ २६ ॥

तव हरेर्दयिते दृढभक्तितश्चतसृभिः श्रुतिभिश्चतुराननः।
अभिनुतिं तनुते स्म महोत्सवेष्वहरहर्हरहर्यभिनन्दिताम्॥ २७ ॥

जननि गन्धवहैर्भवदुत्सवे खगपतिः श्रुतिसौरभशोभनैः।
श्रमहरैर्जनितैर्निजपक्षतिव्यजनतो जनतोषणमातनोत्॥ २८ ॥

तनुभृतां तव देवि महोत्सवे नटनगाननतिस्तवनादयः।
परमभक्तिभरादिह नाभवन् श्रमकरा मकरालयकन्यके॥ २९ ॥

पदयुगं तव भक्तिभरादहं प्रथमिकामुपगम्य सुरस्त्रिया।
हरिपुरन्ध्रि महेऽङ्गजितस्फुरत्कनकया न कया परिचर्यते॥ ३० ॥

दिनकरं तमसामिव राजयः कमलवासिनि कल्मषपङ्क्तयः।
अपि विलोकयितुं प्रभवन्ति ते जनमहो न महोत्सवदर्शिनम्॥ ३१ ॥

तव महे सुरमानवदानव प्रभृतिपादहतिप्रभवै रमे।
क्षितिरजोनिचयैः स्थगितातपो दिनकरो न करोति जनव्यथाम्॥ ३२ ॥

अथ तवास्यविधोरवलोकनात् सुरकराम्बुरुहाणि महोत्सवे।
मुकुलितान्युडुपङ्क्तिपरिस्फुरन्नवरदे वरदे कमलालये॥ ३३ ॥

मुकुलितं लपनेन कराम्बुजैर्मुदितमक्षिचकोरकुलैः सताम्।
तव महेऽम्ब हरौ नयनीभवद्रविविधौ विविधौजसि भात्यपि॥ ३४ ॥

तवसिषेविषया विषयान्तरत्यजननिश्चलचेतस उत्सवे।
प्रजहुरम्ब तपोऽपि पराशरप्रभृतयो भृतयोगकलाः स्वयम्॥ ३५॥

सुमनसो मुनयश्च तवोत्सवे त्रिदिवधेनुपयोरसधारया।
विरचयन्त्यभिषेकविधानमुच्छ्रयजुषां यजुषां प्रकरै रमे॥ ३६॥

विधिशिवादिसुरेषु तवोत्सवे विरचयत्स्वभिषेचनमिन्दिरे।
मनुशतं मुनिमाणवकाः स्फुटध्वनि जगुर्निजगुर्वभिचोदिताः॥ ३७॥

तव महेष्वभिषेकविधौ कृते जगदशेषमगादपतापताम्।
तदिदमद्भुतमम्ब फलिस्थलात् फलगतिर्लगति स्म परत्र यत्॥ ३८॥

अथ तवोत्सवधाम्नि बुधाः सुधाकरसहोदरि सादरमर्चयन्।
सुरहिते भवतीं श्रुतषड्दारवकुलैर्वकुलैरपि चम्पकैः॥ ३९॥

मधुलिहां भवदङ्घ्रिसमर्पितप्रसववासवतां कमले तदा।
सुरकिरीटगताज्जगृहे भिदा खलवैर्वलवैरिशिलाकुलात्॥ ४०॥

सुमनसो भगदङ्घ्रिजुषां रमे सुमनसामनुषङ्गत उत्सवे।
तव पदाम्बुजभाजमपूजयन् सुमलिनामलिनामपि मण्डलीम्॥ ४१॥

स्वशिरसा दधतः कुसुमं मुदा सुमहिता इति नाद्भुतमुत्सवे।
चरणयोः सुरपङ्क्तिभिरर्पितं तव नरा वनराशितनूभवे॥ ४२॥

पनसचूतफलादिभिरुज्ज्वलं सरससूपमपूपशतावृतम्।
अथ निवेदनमम्ब सुरैःक्षरद्घृतवरं तव रम्यमकल्प्यत॥ ४३॥

जननि शेषतया भृशमुत्सुकैस्तव निवेदितशेषमभुज्यत।
सुमधुरं सुमनोभिरथोत्सवापवरके वरकेतनभूषिते॥ ४४॥

अथ सुधान्यभवं जनमोदनं जननि मानसरञ्जनमोदनम्।
भवदवेक्षण संस्कृतमत्ति यो रसनया स न याचति तां सुधाम्॥ ४५॥

अधिभवद्भवनाग्रवितर्दिकं जननि जाग्रत एव जयादयः।
अगणयन्नमरानपि तावके घनमहे न महेन्द्रपुरःसरान्॥ ४६॥

जनविमर्दशमोद्यतनिर्दयोन्नटचमूपतिवेत्रहतिस्पृशाम्।
प्रहृतिरस्ति मदम्ब महे तवार्चनकृतां न कृतान्तकृतान्ततः॥ ४७ ॥

तव महोत्सववैभवदर्शिनां तनुभृतां विविधैः स्तवनादिभिः।
प्रमुदिता कमले भवती सतीरपरिपूः परिपूरयति श्रियः॥ ४८ ॥

जननि तस्य जनस्य वृथा सुधासहभवे विदधे विधिरीक्षणे।
य इह नानुभवेदलसस्तवोत्सवरसं वरसंमदकारणम्॥ ४९ ॥

भवदीयोत्सवविभवं फणिपतिवाचस्पतिप्रभृतिवर्ण्यम्।
कथमल्पधियः कवयः कथयन्तु क्षीरनीरधेः कन्ये॥ ५० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे उत्सवस्तबकः ॥